# Shri Rama Sahasranama Stotra

# શ્રીરામસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : rAma sahasranAmastotra from AnandarAmAyaNa but shorter

File name : rama1000.itx

Category : sahasranAma, raama, stotra

Location : doc_raama

Transliterated by : Sowmya Ramkumar

Proofread by : Sowmya Ramkumar, PSA Easwaran, Kirk Wortman

Description-comments : Sri Vishnu Sthuthi Manjari Volume 1 page 426. This is same as one from AnandarAmAyaNa except end verses

Latest update : April 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2022

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામસ્તોત્રમ્

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
રામં નિશાચરવિનાશકરં નમામિ ॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
મધ્યે પુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥

પાર્વત્યુવાચ-

શ્રોતુમિચ્છામ્યહં દેવ તદેવં સર્વકામદમ્ ।
નામ્નાં સહસ્રં રામસ્ય બ્રૂહિ યદ્યસ્તિ મે દયા ॥ ૧

શ્રીમહાદેવ ઉવાચ-
અથ વક્ષ્યામિ તે દેવિ રામનામસહસ્રકમ્ ।
શ઼ૃણુ ચૈકમનાઃ સ્તોત્રં ગુહ્યાદ્ગુહ્યતરં મહત્ ॥ ૨
અસ્ય શ્રીરામસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય, ભગવાન્ ઈશ્વર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીરામઃ પરમાત્મા દેવતા ।
શ્રીમાન્મહાવિષ્ણુરિતિ બીજમ્ । ગુણભૃન્નિર્ગુણો મહાનિતિ શક્તિઃ ।
સંસારતારકો રામ ઇતિ મન્ત્રઃ । સચ્ચિદાનન્દવિગ્રહ ઇતિ કીલકમ્ ।
અક્ષયઃ પુરુષઃ સાક્ષીતિ કવચમ્ । અજેયઃ સર્વભૂતાનાં ઇત્યસ્ત્રમ્ ।
રાજીવલોચનઃ શ્રીમાનિતિ ધ્યાનમ્ ।
શ્રીરામપ્રીત્યર્થે દિવ્યસહસ્રનામજપે
વિનિયોગઃ ।

કરન્યાસઃ -
શ્રીરામચન્દ્રાયેત્યઙ્ગુષ્ઠાભ્યાં નમઃ ।

સીતાપતયે ઇતિ તર્જનીભ્યાં નમઃ ।
રઘુનાથાયેતિ મધ્યમાભ્યાં નમઃ ।
ભરતાગ્રજાયેત્યનામિકાભ્યાં નમઃ ।
દશરથાત્મજાયેતિ કનિષ્ઠિકાભ્યાં નમઃ ।
હનુમત્પ્રભવે ઇતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ।

ધ્યાનમ્-
વિજ્ઞાનહેતું વિમલાયતાક્ષં પ્રજ્ઞાનરૂપં સ્વસુખૈકહેતુમ્ ।
શ્રીરામચન્દ્રં હરિમાદિદેવં પરાત્પરં રામમહં ભજામિ ॥

તત્ત્વસ્વરૂપં પુરુષં પુરાણં સ્વતેજસા પૂરિતવિશ્વમેકમ્ ।
રાજાધિરાજં રવિમણ્ડલસ્થં વિશ્વેશ્વરં રામમહં ભજામિ ।

લમિત્યાદિપઞ્ચપૂજાઃ ।

ૐ રામઃ શ્રીમાન્ મહાવિષ્ણુર્જિષ્ણુર્દેવહિતાવહઃ ।
તત્ત્વાત્મા તારકં બ્રહ્મ શાશ્વતઃ સર્વસિદ્ધિદઃ ॥

રાજીવલોચનઃ શ્રીમાન્ શ્રીરામો રઘુપુઙ્ગવઃ ।
રામભદ્રઃ સદાચારો રાજેન્દ્રો જાનકીપતિઃ ॥ ૧॥

અગ્રગણ્યો વરેણ્યશ્ચ વરદઃ પરમેશ્વરઃ ।
જનાર્દનો જિતામિત્રઃ પરાર્થૈકપ્રયોજનઃ ॥ ૨॥

વિશ્વામિત્રપ્રિયો દાન્તઃ શત્રુજિચ્છત્રુતાપનઃ ।
સર્વજ્ઞઃ સર્વદેવાદિઃ શરણ્યો વાલિમર્દનઃ ॥ ૩॥

જ્ઞાનભાવ્યોઽપરિચ્છેદ્યો વાગ્મી સત્યવ્રતઃ શુચિઃ ।
જ્ઞાનગમ્યો દૃઢપ્રજ્ઞઃ ખરધ્વંસી પ્રતાપવાન્ ॥ ૪॥

દ્યુતિમાનાત્મવાન્ વીરો જિતક્રોધોઽરિમર્દનઃ ।
વિશ્વરૂપો વિશાલાક્ષઃ પ્રભુઃ પરિવૃઢો દૃઢઃ ॥ ૫॥

ઈશઃ ખડ્ગધરઃ શ્રીમાન્ કૌસલેયોઽનસૂયકઃ ।
વિપુલાંસો મહોરસ્કઃ પરમેષ્ઠી પરાયણઃ ॥ ૬॥

સત્યવ્રતઃ સત્યસન્ધો ગુરુઃ પરમધાર્મિકઃ ।
લોકજ્ઞો લોકવન્દ્યશ્ચ લોકાત્મા લોકકૃત્પરઃ ॥ ૭॥

અનાદિર્ભગવાન્ સેવ્યો જિતમાયો રઘૂદ્વહઃ ।
રામો દયાકરો દક્ષઃ સર્વજ્ઞઃ સર્વપાવનઃ ॥ ૮॥

બ્રહ્મણ્યો નીતિમાન્ ગોપ્તા સર્વદેવમયો હરિઃ ।
સુન્દરઃ પીતવાસાશ્ચ સૂત્રકારઃ પુરાતનઃ ॥ ૯॥

સૌમ્યો મહર્ષિઃ કોદણ્ડી સર્વજ્ઞઃ સર્વકોવિદઃ ।
કવિઃ સુગ્રીવવરદઃ સર્વપુણ્યાધિકપ્રદઃ ॥ ૧૦॥

ભવ્યો જિતારિષડ્વર્ગો મહોદારોઽઘનાશનઃ ।
સુકીર્તિરાદિપુરુષઃ કાન્તઃ પુણ્યકૃતાગમઃ ॥ ૧૧॥

અકલ્મષશ્ચતુર્બાહુઃ સર્વાવાસો દુરાસદઃ ।
સ્મિતભાષી નિવૃત્તાત્મા સ્મૃતિમાન્ વીર્યવાન્ પ્રભુઃ ॥ ૧૨॥

ધીરો દાન્તો ઘનશ્યામઃ સર્વાયુધવિશારદઃ ।
અધ્યાત્મયોગનિલયઃ સુમના લક્ષ્મણાગ્રજઃ ॥ ૧૩॥

સર્વતીર્થમયઃ શૂરઃ સર્વયજ્ઞફલપ્રદઃ ।
યજ્ઞસ્વરૂપી યજ્ઞેશો જરામરણવર્જિતઃ ॥ ૧૪॥

વર્ણાશ્રમકરો વર્ણી શત્રુજિત્ પુરુષોત્તમઃ ।
વિભીષણપ્રતિષ્ઠાતા પરમાત્મા પરાત્પરઃ ॥ ૧૫॥

પ્રમાણભૂતો દુર્જ્ઞેયઃ પૂર્ણઃ પરપુરઞ્જયઃ ।
અનન્તદૃષ્ટિરાનન્દો ધનુર્વેદો ધનુર્ધરઃ ॥ ૧૬॥

ગુણાકરો ગુણશ્રેષ્ઠઃ સચ્ચિદાનન્દવિગ્રહઃ ।
અભિવન્દ્યો મહાકાયો વિશ્વકર્મા વિશારદઃ ॥ ૧૭॥

વિનીતાત્મા વીતરાગસ્તપસ્વીશો જનેશ્વરઃ ।
કલ્યાણપ્રકૃતિઃ કલ્પઃ સર્વેશઃ સર્વકામદઃ ॥ ૧૮॥

અક્ષયઃ પુરુષઃ સાક્ષી કેશવઃ પુરુષોત્તમઃ ।
લોકાધ્યક્ષો મહામાયો વિભીષણવરપ્રદઃ ॥ ૧૯॥

આનન્દવિગ્રહો જ્યોતિર્હનુમત્પ્રભુરવ્યયઃ ।
ભ્રાજિષ્ણુઃ સહનો ભોક્તા સત્યવાદી બહુશ્રુતઃ ॥ ૨૦॥

સુખદઃ કારણં કર્તા ભવબન્ધવિમોચનઃ ।
દેવચૂડામણિર્નેતા બ્રહ્મણ્યો બ્રહ્મવર્ધનઃ ॥ ૨૧॥

સંસારોત્તારકો રામઃ સર્વદુઃખવિમોક્ષકૃત્ ।
વિદ્વત્તમો વિશ્વકર્તા વિશ્વહર્તા ચ વિશ્વકૃત્ ॥ ૨૨॥

નિત્યો નિયતકલ્યાણઃ સીતાશોકવિનાશકૃત્ ।
કાકુત્સ્થઃ પુણ્ડરીકાક્ષો વિશ્વામિત્રભયાપહઃ ॥ ૨૩॥

મારીચમથનો રામો વિરાધવધપણ્ડિતઃ ।
દુઃસ્વપ્નનાશનો રમ્યઃ કિરીટી ત્રિદશાધિપઃ ॥ ૨૪॥

મહાધનુર્મહાકાયો ભીમો ભીમપરાક્રમઃ ।
તત્ત્વસ્વરૂપી તત્ત્વજ્ઞસ્તત્ત્વવાદી સુવિક્રમઃ ॥ ૨૫॥

ભૂતાત્મા ભૂતકૃત્સ્વામી કાલજ્ઞાની મહાપટુઃ ।
અનિર્વિણ્ણો ગુણગ્રાહી નિષ્કલઙ્કઃ કલઙ્કહા ॥ ૨૬॥

સ્વભાવભદ્રઃ શત્રુઘ્નઃ કેશવઃ સ્થાણુરીશ્વરઃ ।
ભૂતાદિઃ શમ્ભુરાદિત્યઃ સ્થવિષ્ઠઃ શાશ્વતો ધ્રુવઃ ॥ ૨૭॥

કવચી કુણ્ડલી ચક્રી ખડ્ગી ભક્તજનપ્રિયઃ ।
અમૃત્યુર્જન્મરહિતઃ સર્વજિત્સર્વગોચરઃ ॥ ૨૮॥

અનુત્તમોઽપ્રમેયાત્મા સર્વાદિર્ગુણસાગરઃ ।
સમઃ સમાત્મા સમગો જટામુકુટમણ્ડિતઃ ॥ ૨૯॥

અજેયઃ સર્વભૂતાત્મા વિષ્વક્સેનો મહાતપાઃ ।
લોકાધ્યક્ષો મહાબાહુરમૃતો વેદવિત્તમઃ ॥ ૩૦॥

સહિષ્ણુઃ સદ્ગતિઃ શાસ્તા વિશ્વયોનિર્મહાદ્યુતિઃ ।
અતીન્દ્ર ઊર્જિતઃ પ્રાંશુરુપેન્દ્રો વામનો બલી ॥ ૩૧॥

ધનુર્વેદો વિધાતા ચ બ્રહ્મા વિષ્ણુશ્ચ શઙ્કરઃ ।
હંસો મરીચિર્ગોવિન્દો રત્નગર્ભો મહામતિઃ ॥ ૩૨॥

વ્યાસો વાચસ્પતિઃ સર્વદર્પિતાસુરમર્દનઃ ।
જાનકીવલ્લભઃ પૂજ્યઃ પ્રકટઃ પ્રીતિવર્ધનઃ ॥ ૩૩॥

સમ્ભવોઽતીન્દ્રિયો વેદ્યોઽનિર્દેશો જામ્બવત્પ્રભુઃ ।
મદનો મથનો વ્યાપી વિશ્વરૂપો નિરઞ્જનઃ ॥ ૩૪॥

નારાયણોઽગ્રણીઃ સાધુર્જટાયુપ્રીતિવર્ધનઃ ।

નૈકરૂપો જગન્નાથઃ સુરકાર્યહિતઃ સ્વભૂઃ ॥ ૩૫॥

જિતક્રોધો જિતારાતિઃ પ્લવગાધિપરાજ્યદઃ ।
વસુદઃ સુભુજો નૈકમાયો ભવ્યપ્રમોદનઃ ॥ ૩૬॥

ચણ્ડાંશુઃ સિદ્ધિદઃ કલ્પઃ શરણાગતવત્સલઃ ।
અગદો રોગહર્તા ચ મન્ત્રજ્ઞો મન્ત્રભાવનઃ ॥ ૩૭॥

સૌમિત્રિવત્સલો ધુર્યો વ્યક્તાવ્યક્તસ્વરૂપધૃક્ ।
વસિષ્ઠો ગ્રામણીઃ શ્રીમાનનુકૂલઃ પ્રિયંવદઃ ॥ ૩૮॥

અતુલઃ સાત્ત્વિકો ધીરઃ શરાસનવિશારદઃ ।
જ્યેષ્ઠઃ સર્વગુણોપેતઃ શક્તિમાંસ્તાટકાન્તકઃ ॥ ૩૯॥

વૈકુણ્ઠઃ પ્રાણિનાં પ્રાણઃ કમઠઃ કમલાપતિઃ ।
ગોવર્ધનધરો મત્સ્યરૂપઃ કારુણ્યસાગરઃ ॥ ૪૦॥

કુમ્ભકર્ણપ્રભેત્તા ચ ગોપીગોપાલસંવૃતઃ ।
માયાવી વ્યાપકો વ્યાપી રૈણુકેયબલાપહઃ ॥ ૪૧॥

પિનાકમથનો વન્દ્યઃ સમર્થો ગરુડધ્વજઃ ।
લોકત્રયાશ્રયો લોકચરિતો ભરતાગ્રજઃ ॥ ૪૨॥

શ્રીધરઃ સદ્ગતિર્લોકસાક્ષી નારાયણો બુધઃ ।
મનોવેગી મનોરૂપી પૂર્ણઃ પુરુષપુઙ્ગવઃ ॥ ૪૩॥

યદુશ્રેષ્ઠો યદુપતિર્ભૂતાવાસઃ સુવિક્રમઃ ।
તેજોધરો ધરાધારશ્ચતુર્મૂર્તિર્મહાનિધિઃ ॥ ૪૪॥

ચાણૂરમર્દનો દિવ્યઃ શાન્તો ભરતવન્દિતઃ ।
શબ્દાતિગો ગભીરાત્મા કોમલાઙ્ગઃ પ્રજાગરઃ ॥ ૪૫॥

લોકગર્ભઃ શેષશાયી ક્ષીરાબ્ધિનિલયોઽમલઃ ।
આત્મયોનિરદીનાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૪૬॥

અમૃતાંશુર્મહાગર્ભો નિવૃત્તવિષયસ્પૃહઃ ।
ત્રિકાલજ્ઞો મુનિઃ સાક્ષી વિહાયસગતિઃ કૃતી ॥ ૪૭॥

પર્જન્યઃ કુમુદો ભૂતાવાસઃ કમલલોચનઃ ।
શ્રીવત્સવક્ષાઃ શ્રીવાસો વીરહા લક્ષ્મણાગ્રજઃ ॥ ૪૮॥

લોકાભિરામો લોકારિમર્દનઃ સેવકપ્રિયઃ ।
સનાતનતમો મેઘશ્યામલો રાક્ષસાન્તકૃત્ ॥ ૪૯॥

દિવ્યાયુધધરઃ શ્રીમાનપ્રમેયો જિતેન્દ્રિયઃ ।
ભૂદેવવન્દ્યો જનકપ્રિયકૃત્પ્રપિતામહઃ ॥ ૫૦॥

ઉત્તમઃ સાત્ત્વિકઃ સત્યઃ સત્યસન્ધસ્ત્રિવિક્રમઃ ।
સુવ્રતઃ સુલભઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુધીઃ ॥ ૫૧॥

દામોદરોઽચ્યુતઃ શાર્ઙ્ગી વામનો મધુરાધિપઃ ।
દેવકીનન્દનઃ શૌરિઃ શૂરઃ કૈટભમર્દનઃ ॥ ૫૨॥

સપ્તતાલપ્રભેત્તા ચ મિત્રવંશપ્રવર્ધનઃ ।
કાલસ્વરૂપી કાલાત્માકાલઃ કલ્યાણદઃકવિઃ ।
સંવત્સર ઋતુઃ પક્ષો હ્યયનં દિવસો યુગઃ ॥ ૫૩॥

સ્તવ્યો વિવિક્તો નિર્લેપઃ સર્વવ્યાપી નિરાકુલઃ ।
અનાદિનિધનઃ સર્વલોકપૂજ્યો નિરામયઃ ॥ ૫૪॥

રસો રસજ્ઞઃ સારજ્ઞો લોકસારો રસાત્મકઃ ।
સર્વદુઃખાતિગો વિદ્યારાશિઃ પરમગોચરઃ ॥ ૫૫॥

શેષો વિશેષો વિગતકલ્મષો રઘુનાયકઃ ।
વર્ણશ્રેષ્ઠો વર્ણવાહ્યો વર્ણ્યો વર્ણ્યગુણોજ્જ્વલઃ ॥ ૫૬॥

કર્મસાક્ષ્યમરશ્રેષ્ઠો દેવદેવઃ સુખપ્રદઃ ।
દેવાધિદેવો દેવર્ષિર્દેવાસુરનમસ્કૃતઃ ॥ ૫૭॥

સર્વદેવમયશ્ચક્રી શાર્ઙ્ગપાણી રઘૂત્તમઃ ।
મનો બુદ્ધિરહઙ્કારઃ પ્રકૃતિઃ પુરુષોઽવ્યયઃ ॥ ૫૮॥

અહલ્યાપાવનઃ સ્વામી પિતૃભક્તો વરપ્રદઃ ।
ન્યાયો ન્યાયી નયી શ્રીમાન્નયો નગધરો ધ્રુવઃ ॥ ૫૯॥

લક્ષ્મીવિશ્વમ્ભરાભર્તા દેવેન્દ્રો બલિમર્દનઃ ।
વાણારિમર્દનો યજ્વાનુત્તમો મુનિસેવિતઃ ॥ ૬૦॥

દેવાગ્રણીઃ શિવધ્યાનતત્પરઃ પરમઃ પરઃ ।
સામગેયઃ પ્રિયોઽક્રૂરઃ પુણ્યકીર્તિઃ સુલોચનઃ ॥ ૬૧॥

પુણ્યઃ પુણ્યાધિકઃ પૂર્વઃ પૂર્ણઃ પૂરયિતા રવિઃ ।

જટિલઃ કલ્મષધ્વાન્તપ્રભઞ્જનવિભાવસુઃ ॥ ૬૨॥

અવ્યક્તલક્ષણોઽવ્યક્તો દશાસ્યદ્વિપકેસરી ।
કલાનિધિઃ કલાનાથો કમલાનન્દવર્ધનઃ ॥ ૬૩॥

જયી જિતારિઃ સર્વાદિઃ શમનો ભવભઞ્જનઃ ।
અલઙ્કરિષ્ણુરચલો રોચિષ્ણુર્વિક્રમોત્તમઃ ॥ ૬૪॥

આશુઃ શબ્દપતિઃ શબ્દાગોચરો રઞ્જનો રઘુઃ ।
નિઃશબ્દઃ પ્રણવો માલી સ્થૂલઃ સૂક્ષ્મો વિલક્ષણઃ ॥ ૬૫॥

આત્મયોનિરયોનિશ્ચ સપ્તજિહ્વઃ સહસ્રપાત્ ।
સનાતનતમઃ સ્રગ્વી પેશલો જવિનાં વરઃ ॥ ૬૬॥

શક્તિમાઞ્શઙ્ખભૃન્નાથઃ ગદાપદ્મરથાઙ્ગભૃત્ ।
નિરીહો નિર્વિકલ્પશ્ચ ચિદ્રૂપો વીતસાધ્વસઃ ॥ ૬૭॥

શતાનનઃ સહસ્રાક્ષઃ શતમૂર્તિર્ધનપ્રભઃ ।
હૃત્પુણ્ડરીકશયનઃ કઠિનો દ્રવ એવ ચ ॥ ૬૮॥

ઉગ્રો ગ્રહપતિઃ શ્રીમાન્ સમર્થોઽનર્થનાશનઃ ।
અધર્મશત્રૂ રક્ષોઘ્નઃ પુરુહૂતઃ પુરુષ્ટુતઃ ॥ ૬૯॥

બ્રહ્મગર્ભો બૃહદ્ગર્ભો ધર્મધેનુર્ધનાગમઃ ।
હિરણ્યગર્ભો જ્યોતિષ્માન્ સુલલાટઃ સુવિક્રમઃ ॥ ૭૦॥

શિવપૂજારતઃ શ્રીમાન્ ભવાનીપ્રિયકૃદ્વશી ।
નરો નારાયણઃ શ્યામઃ કપર્દી નીલલોહિતઃ ॥ ૭૧॥

રુદ્રઃ પશુપતિઃ સ્થાણુર્વિશ્વામિત્રો દ્વિજેશ્વરઃ ।
માતામહો માતરિશ્વા વિરિઞ્ચો વિષ્ટરશ્રવાઃ ॥ ૭૨॥

અક્ષોભ્યઃ સર્વભૂતાનાં ચણ્ડઃ સત્યપરાક્રમઃ ।
વાલખિલ્યો મહાકલ્પઃ કલ્પવૃક્ષઃ કલાધરઃ ॥ ૭૩॥

નિદાઘસ્તપનોઽમોઘઃ શ્લક્ષ્ણઃ પરબલાપહૃત્ ।
કબન્ધમથનો દિવ્યઃ કમ્બુગ્રીવશિવપ્રિયઃ ॥ ૭૪॥

શઙ્ખોઽનિલઃ સુનિષ્પન્નઃ સુલભઃ શિશિરાત્મકઃ ।
અસંસૃષ્ટોઽતિથિઃ શૂરઃ પ્રમાથી પાપનાશકૃત્ ॥ ૭૫॥

વસુશ્રવાઃ કવ્યવાહઃ પ્રતપ્તો વિશ્વભોજનઃ ।
રામો નીલોત્પલશ્યામો જ્ઞાનસ્કન્ધો મહાદ્યુતિઃ ॥ ૭૬॥

પવિત્રપાદઃ પાપારિર્મણિપૂરો નભોગતિઃ ।
ઉત્તારણો દુષ્કૃતિહા દુર્ધર્ષો દુઃસહોઽભયઃ ॥ ૭૭॥

અમૃતેશોઽમૃતવપુર્ધર્મી ધર્મઃ કૃપાકરઃ ।
ભર્ગો વિવસ્વાનાદિત્યો યોગાચાર્યો દિવસ્પતિઃ ॥ ૭૮॥

ઉદારકીર્તિરુદ્યોગી વાઙ્મયઃ સદસન્મયઃ ।
નક્ષત્રમાલી નાકેશઃ સ્વાધિષ્ઠાનઃ ષડાશ્રયઃ ॥ ૭૯॥

ચતુર્વર્ગફલો વર્ણી શક્તિત્રયફલં નિધિઃ ।
નિધાનગર્ભો નિર્વ્યાજો ગિરીશો વ્યાલમર્દનઃ ॥ ૮૦॥

શ્રીવલ્લભઃ શિવારમ્ભઃ શાન્તિર્ભદ્રઃ સમઞ્જસઃ ।
ભૂશયો ભૂતિકૃદ્ભૂતિર્ભૂષણો ભૂતવાહનઃ ॥ ૮૧॥

અકાયો ભક્તકાયસ્થઃ કાલજ્ઞાની મહાવટુઃ ।
પરાર્થવૃત્તિરચલો વિવિક્તઃ શ્રુતિસાગરઃ ॥ ૮૨॥

સ્વભાવભદ્રો મધ્યસ્થઃ સંસારભયનાશનઃ ।
વેદ્યો વૈદ્યો વિયદ્ગોપ્તા સર્વામરમુનીશ્વરઃ ॥ ૮૩॥

સુરેન્દ્રઃ કરણં કર્મ કર્મકૃત્કર્મ્યધોક્ષજઃ ।
ધ્યેયો ધુર્યો ધરાધીશઃ સંકલ્પઃ શર્વરીપતિઃ ॥ ૮૪॥

પરમાર્થગુરુર્વૃદ્ધઃ શુચિરાશ્રિતવત્સલઃ ।
વિષ્ણુર્જિષ્ણુર્વિભુર્વન્દ્યો યજ્ઞેશો યજ્ઞપાલકઃ ॥ ૮૫॥

પ્રભવિષ્ણુર્ગ્રસિષ્ણુશ્ચ લોકાત્મા લોકભાવનઃ ।
કેશવઃ કેશિહા કાવ્યઃ કવિઃ કારણકારણમ્ ॥ ૮૬॥

કાલકર્તા કાલશેષો વાસુદેવઃ પુરુષ્ટુતઃ ।
આદિકર્તા વરાહશ્ચ માધવો મધુસૂદનઃ ॥ ૮૭॥

નારાયણો નરો હંસો વિષ્વક્સેનો જનાર્દનઃ ।
વિશ્વકર્તા મહાયજ્ઞો જ્યોતિષ્માન્ પુરુષોત્તમઃ ॥ ૮૮॥

વૈકુણ્ઠઃ પુણ્ડરીકાક્ષઃ કૃષ્ણઃ સૂર્યઃ સુરાર્ચિતઃ ।
નારસિંહો મહાભીમો વક્રદંષ્ટ્રો નખાયુધઃ ॥ ૮૯॥

આદિદેવો જગત્કર્તા યોગીશો ગરુડધ્વજઃ ।
ગોવિન્દો ગોપતિર્ગોપ્તા ભૂપતિર્ભુવનેશ્વરઃ ॥ ૯૦॥

પદ્મનાભો હૃષીકેશો ધાતા દામોદરઃ પ્રભુઃ ।
ત્રિવિક્રમસ્ત્રિલોકેશો બ્રહ્મેશઃ પ્રીતિવર્ધનઃ ॥ ૯૧॥

વામનો દુષ્ટદમનો ગોવિન્દો ગોપવલ્લભઃ ।
ભક્તપ્રિયોઽચ્યુતઃ સત્યઃ સત્યકીર્તિર્ધૃતિઃ સ્મૃતિઃ ॥ ૯૨॥

કારુણ્યં કરુણો વ્યાસઃ પાપહા શાન્તિવર્ધનઃ ।
સંન્યાસી શાસ્ત્રતત્ત્વજ્ઞો મન્દરાદ્રિનિકેતનઃ ॥ ૯૩॥

બદરીનિલયઃ શાન્તસ્તપસ્વી વૈદ્યુતપ્રભઃ ।
ભૂતાવાસો ગુહાવાસઃ શ્રીનિવાસઃ શ્રિયઃ પતિઃ ॥ ૯૪॥

તપોવાસો મુદાવાસઃ સત્યવાસઃ સનાતનઃ ।
પુરુષઃ પુષ્કરઃ પુણ્યઃ પુષ્કરાક્ષો મહેશ્વરઃ ॥ ૯૫॥

પૂર્ણમૂર્તિઃ પુરાણજ્ઞઃ પુણ્યદઃ પ્રીતિવર્ધનઃ ।
શઙ્ખી ચક્રી ગદી શાર્ઙ્ગી લાઙ્ગલી મુસલી હલી ॥ ૯૬॥

કિરીટી કુણ્ડલી હારી મેખલી કવચી ધ્વજી ।
યોદ્ધા જેતા મહાવીર્યઃ શત્રુજિચ્છત્રુતાપનઃ ॥ ૯૭॥

શાસ્તા શાસ્ત્રકરઃ શાસ્ત્રં શઙ્કરઃ શઙ્કરસ્તુતઃ ।
સારથિઃ સાત્ત્વિકઃ સ્વામી સામવેદપ્રિયઃ સમઃ ॥ ૯૮॥

પવનઃ સંહતઃ શક્તિઃ સમ્પૂર્ણાઙ્ગઃ સમૃદ્ધિમાન્ ।
સ્વર્ગદઃ કામદઃ શ્રીદઃ કીર્તિદોઽકીર્તિનાશનઃ ॥ ૯૯॥

મોક્ષદઃ પુણ્ડરીકાક્ષઃ ક્ષીરાબ્ધિકૃતકેતનઃ ।
સર્વાત્મા સર્વલોકેશઃ પ્રેરકઃ પાપનાશનઃ ॥ ૧૦૦॥

સર્વવ્યાપી જગન્નાથઃ સર્વલોકમહેશ્વરઃ ।
સર્ગસ્થિત્યન્તકૃદ્દેવઃ સર્વલોકસુખાવહઃ ॥ ૧૦૧॥

અક્ષય્યઃ શાશ્વતોઽનન્તઃ ક્ષયવૃદ્ધિવિવર્જિતઃ ।
નિર્લેપો નિર્ગુણઃ સૂક્ષ્મો નિર્વિકારો નિરઞ્જનઃ ॥ ૧૦૨॥

સર્વોપાધિવિનિર્મુક્તઃ સત્તામાત્રવ્યવસ્થિતઃ ।

અધિકારી વિભુર્નિત્યઃ પરમાત્મા સનાતનઃ ॥ ૧૦૩॥

અચલો નિર્મલો વ્યાપી નિત્યતૃપ્તો નિરાશ્રયઃ ।
શ્યામો યુવા લોહિતાક્ષો દીપ્તાસ્યો મિતભાષણઃ ॥ ૧૦૪॥

આજાનુબાહુઃ સુમુખઃ સિંહસ્કન્ધો મહાભુજઃ ।
સત્યવાન્ ગુણસમ્પન્નઃ સ્વયન્તેજાઃ સુદીપ્તિમાન્ ॥ ૧૦૫॥

કાલાત્મા ભગવાન્ કાલઃ કાલચક્રપ્રવર્તકઃ ।
નારાયણઃ પરઞ્જ્યોતિઃ પરમાત્મા સનાતનઃ ॥ ૧૦૬॥

વિશ્વસૃડ્ વિશ્વગોપ્તા ચ વિશ્વભોક્તા ચ શાશ્વતઃ ।
વિશ્વેશ્વરો વિશ્વમૂર્તિર્વિશ્વાત્મા વિશ્વભાવનઃ ॥ ૧૦૭॥

સર્વભૂતસુહૃચ્છાન્તઃ સર્વભૂતાનુકમ્પનઃ ।
સર્વેશ્વરેશ્વરઃ સર્વઃ શ્રીમાનાશ્રિતવત્સલઃ ॥ ૧૦૮॥

સર્વગઃ સર્વભૂતેશઃ સર્વભૂતાશયસ્થિતઃ ।
અભ્યન્તરસ્થસ્તમસશ્છેત્તા નારાયણઃ પરઃ ॥ ૧૦૯॥

અનાદિનિધનઃ સ્રષ્ટા પ્રજાપતિપતિર્હરિઃ ।
નરસિંહો હૃષીકેશઃ સર્વાત્મા સર્વદૃગ્વશી ॥ ૧૧૦॥

જગતસ્તસ્થુષશ્ચૈવ પ્રભુર્નેતા સનાતનઃ ।
કર્તા ધાતા વિધાતા ચ સર્વેષાં પ્રભુરીશ્વરઃ ॥ ૧૧૧॥

સહસ્રમૂર્તિર્વિશ્વાત્મા વિષ્ણુર્વિશ્વદૃગવ્યયઃ ।
પુરાણપુરુષઃ સ્રષ્ટા સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૧૨॥

તત્ત્વં નારાયણો વિષ્ણુર્વાસુદેવઃ સનાતનઃ ।
પરમાત્મા પરં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૧૧૩॥

પરઞ્જ્યોતિઃ પરન્ધામઃ પરાકાશઃ પરાત્પરઃ ।
અચ્યુતઃ પુરુષઃ કૃષ્ણઃ શાશ્વતઃ શિવ ઈશ્વરઃ ॥ ૧૧૪॥

નિત્યઃ સર્વગતઃ સ્થાણુરુગ્રઃ સાક્ષી પ્રજાપતિઃ ।
હિરણ્યગર્ભઃ સવિતા લોકકૃલ્લોકભૃદ્વિભુઃ ॥ ૧૧૫॥

રામઃ શ્રીમાન્ મહાવિષ્ણુર્જિષ્ણુર્દેવહિતાવહઃ ।
તત્ત્વાત્મા તારકં બ્રહ્મ શાશ્વતઃ સર્વસિદ્ધિદઃ ॥ ૧૧૬॥

અકારવાચ્યો ભગવાન્ શ્રીર્ભૂ લીલાપતિઃ પુમાન્ ।
સર્વલોકેશ્વરઃ શ્રીમાન્ સર્વજ્ઞઃ સર્વતોમુખઃ ॥ ૧૧૭॥

સ્વામી સુશીલઃ સુલભઃ સર્વજ્ઞઃ સર્વશક્તિમાન્ ।
નિત્યઃ સમ્પૂર્ણકામશ્ચ નૈસર્ગિકસુહૃત્સુખી ॥ ૧૧૮॥

કૃપાપીયૂષજલધિઃ શરણ્યઃ સર્વદેહિનામ્ ।
શ્રીમાન્નારાયણઃ સ્વામી જગતાં પતિરીશ્વરઃ ॥ ૧૧૯॥

શ્રીશઃ શરણ્યો ભૂતાનાં સંશ્રિતાભીષ્ટદાયકઃ ।
અનન્તઃ શ્રીપતી રામો ગુણભૃન્નિર્ગુણો મહાન્ ॥ ૧૨૦॥

॥ ઇતિ શ્રીરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sowmya Ramkumar

Proofread by Sowmya Ramkumar, PSA Easwaran, Kirt Wortman

---

*Shri Rama Sahasranama Stotra*

pdf was typeset on March 23, 2022

Please send corrections to *sanskrit@cheerful.com*